CC-0. In Public Domain. Digitization by eGangotri

ज्वालापुरीय गुरुकुल महाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

"भारते भातु भारती"

वर्णेकरोऽपि हा ! हन्त ! गतः कवीन्द्रः

—श्री प्रो० हरिश्चन्द्रः रेणापुरकरः
जेवरगी निवासः, हॉटेल परिवारस्य पृष्ठतः
स्टेशन रोड, गुलबर्गा-५८५१०२ (कर्नाटक-प्रदेशः)

(वसन्ततिलका—वृत्तम्)

(१)

साहित्य-काव्य-कमनीयकलाविलासो
वाग्देवता-रुचिरभास्वरकण्ठहारः ।
हा ! हन्त ! हन्त ! सहसैव दिवं प्रयातो
वर्णेकराख्य-कुलभूषणश्रीधरोऽसौ ॥

(२)

दीनं बभूव खलु संस्कृत-विश्वमद्य
लोके बभूव सुतरां सुरवागनाथा ।
म्लानिं गतं च कविमण्डपपद्मवृन्दं
वर्णेकरः कविवरो हि दिवं प्रयातः ॥

(३)

ओजस्विवीर-रसनिर्भरकाव्यवृन्दैः
प्रज्ज्वाल्य लोकहृदयेषु च राष्ट्रभक्तिम् ।
राष्ट्रं चिकीर्षु रवनौ पुनरुज्ज्वलाभं
वर्णेकरोऽद्य गतवान् स महाकवीन्द्रः ॥

(४)

तस्याद्वितीय-महनीय-महाविशालं
ह्यादर्श-भूपशिवरायमहाचरित्रम् ।
येनाष्टषष्टिमितसर्गनिबद्धमासीत्
सोऽयं महाकविरगाद् वर्णेकरोऽसौ ॥

(५)

वैदर्भरीतिमनुसृत्य निबद्धकाव्यै—
र्यस्यातिरम्यरुचिराद्भुतकाव्यवृन्दैः ।
वैदर्भरीतिरससिद्धकवीन्द्रवर्यो
ह्यारोहति स्मृतिपथं कविकालिदासः ॥

(६)

(शिखरिणी—वृत्तम्)

उदात्तोत्कृष्टां तां परममहितां भारतभुवो
जगत्कल्याणार्थी भुवनविदितां संस्कृतिवराम् ।
स्वकीयोजस्विन्या मधुरमनुधास्यन्दिगिरया
गतो गायन् वर्णेकर इति कवीन्द्रोऽपि सहसा ॥

(७)

विवेकानन्दानां चरितविषयं नाटकमपि
निबध्नन्नुत्कृष्टं नवरसगुणालङ्कृतिमयम् ।
तथा नाट्यं भव्यं शिवनृपमहाभिषेकविषयं
प्रयातोऽसौ वर्णेकर इति कवीन्द्रोऽपि सहसा ॥

(शेषांशः २ पृष्ठे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरभाष–४५४२९५ (ज्वालापुरम्) तारगृहम्–महाविद्यालयः, ज्वालापुरम्

भारतोदयः

संस्कृत–मासिकपत्रम्

वर्षम्–६० अङ्काः– ९–११

डा० हरिगोपालशास्त्री
व्याकरणाचार्यः
एम्०ए०, पी–एच्०डी०
राष्ट्रपति–पुरस्कृतः

सह–सम्पादकः
डा० केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम्०ए०, पी–एच्०डी०

प्रबन्ध–सम्पादकः
डा० अजयकौशिकः
एम्०ए०, साहित्याचार्यः

प्रकाशकः
गुरुकुलमहाविद्यालयो ज्वालापुरम्
हरिद्वारम्–२४९४०५ (उ०प्र०)

शुल्क–विवरणम्

प्रत्यङ्कम्	—	५/–
वार्षिकम्	—	५०/–
आजीवनसदस्यता शुल्कम्	—	५००/–

विषयानुक्रमणिका

१– श्रुति–सुधा	–महर्षिदयानन्दसरस्वती	३
२– प्राक्तनपुरावृत्तं देववाणी च	–डा० मदनलालवर्मा	४
३– बुद्धिं नमामः (गलज्जलिका)	–डा० राजेन्द्रमिश्रः	७
४– सायणस्य वैदिकव्याख्यापद्धतिः	–श्री हेरम्बपाण्डेयः	८
५– सामवेदमन्त्रात्मकं काव्यम् (९)	–श्री सन्तरामशास्त्री	९
६– श्वेत–माधव–वृत्तम् (२)	–डा० निरञ्जनमिश्रः	१३
७– विवाहसंस्कारे नारीचर्चा	–डा० मनुदेवबन्धुः	१६

वर्णेकरोऽपि हा ! हन्त ! गतः कविन्द्रः

[प्रथमपृष्ठस्य शेषांशः]

(८)

जगन्नाथं यावद् भवति भुवने संस्कृतमिदं
ततश्चोर्ध्वं नूनं ह्यु परतमिति भ्रान्तविमतिम् ।
निराकुर्वंल्लोके निजसरसकाव्यैरतितरां
प्रयातोऽसौ वर्णेकर इति कवीन्द्रोऽपि महसा ॥

(पृथ्वी—वृत्तम्)

(९)

प्रसादगुणमण्डितं सरस–भव्यभावोत्कटं
दुरूह–पद–वर्जितं सपदि बोधकं स्वाशयम् ।
प्रशस्तिवरभूषितं प्रवर–काव्यनिर्माणकृत्
दिवं प्रति गतो महाकविरहो ! स वर्णेकरः ॥

(शार्दूलक्रीडितम् वृत्तम्)

(१०)

आत्मोदात्तरसार्द्रकाव्यकृतिभिः कोशैस्तथा नाटकैः
नाना–गीतकथाचरित्रकवनैः स्वामोघ–वाक्पाटवैः ।
भाण्डारं सुरवाग्–विशालविपुल ह्याजीवनं पूरयन्
धन्यो हन्त ! गतो महाकविरहो ! तस्मै नमो भूरिशः ॥

(११)

गैर्वाण्या भुवने प्रसारमभवत् यस्योत्कटं काङ्क्षितं
वार्धक्येऽपि तदर्थमेव सततं यात्रा–रतो योऽभवत् ।
गच्छन् संस्कृतहेतुनैव सहसा यानावघट्टे हत–
स्तस्मै देवगिरार्पितात्मजनुषे श्रद्धाञ्जलिर्ह्यर्पये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

प्रविक-भरित-भारतोदयोऽय भव-विभवोद्भवभावनाभिलाषी।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

वर्षम् – ६०	चैत्र, वैशाख, ज्येष्ठ २०५७ वि०	मार्च, अप्रैल, मई २००० ई०	अङ्काः ६–११

श्रुति-सुधा

ओ३म् गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः।
वि त्वा नरः पुरुत्रा सपर्यन् पितुर्न जिव्रेर्वि वेदो भरन्तः॥

—ऋग्वेद १/७०/५

पदार्थ. —(गोषु) पृथिव्यादिषु। (प्रशस्तिम्) प्रशस्तव्यवहारम्। (वनेषु) सम्यग् विभाजकेषु किरणेषु। (धिषे) दधासि। (भरन्त) यो भरति सर्वं विश्वं सर्वान् गुणान्, तत् सम्बुद्धौ। (विश्वे) सर्वे। (बलिम्) संवरणम्। (स्वः) आदित्यम्। (नः) अस्मान्। (वि) विशेषे। (त्वा) त्वाम्। (नरः) नयनकर्त्तारो मनुष्याः। (पुरुत्रा) पुरूणि देयानि (त्रायते यः सः)। (सपर्यन्) परिचरन्ति। (पितुः) (न) इव। (जिव्रेः) जीर्णात् वृद्धावस्थां प्राप्तात् जनकात्। (वि) विशेषे। (वेदः) विन्दन्ति येन सुखानि धनेन तत्। (भरन्त) धरन्तु ॥५॥ अत्रोपमालङ्कारः।

भावार्थः — हे मनुष्याः! सर्वे यूयं येन जगदीश्वरेण सनातनात् कारणात् सर्वाणि कार्याणि वस्तून्युत्पाद्य स्पर्शादयो गुणाः प्रकाशिताः, यस्य सृष्टावुत्पन्नानां जनकस्य पुत्रा इव सर्वे जीवा दायभागिनः सन्ति, येन सर्वेभ्यः सर्वाणि सुखानि दीयन्ते, तस्यात्म–मनोवाक्छरीरधनैर्नित्यं परिचर्य्यां यूयं कुरुत।

–महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, २१५ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक्तनपुरावृत्तं देववाणी च

—डॉ० मदनलालवर्मा
६८, 'सुमंगल', न्यू कालोनी, (हनुमान मन्दिरस्य पृष्ठत)
कुरुक्षेत्र-१३६११८ (हरियाणा-प्रदेशः)

'प्राक्तनपुरावृत्तं देववाणी च'- अनयोर्मिथस्तादृश एव सम्बन्धो यादृशः साहित्यसमाजयोर्भवति। येन प्रकारेण साहित्यं समाजस्य मुकुरो निगद्यते, तेनैव प्रकारेणास्माकं प्राक्तनपुरावृत्तं सुरगिरो निक्षेपं व्यञ्जयति। तस्मादेव संस्कृतस्य महत्ताऽपि सुस्पष्टा जायते।

प्राचीनं भारतीयेतिहासं ज्ञातुं देववाण्याः महत्त्वं सर्वाधिकम्। उत्खननेषु लब्धानां पुरातत्त्वविषयकोपकरणानां, शिलालेखानां, टङ्काणां, मुद्राणां, ताम्रपत्राणां, मूर्तीनां चित्रादीनां ज्ञानमवाप्तुं संस्कृतस्य ज्ञानमत्यावश्यकम्। प्राक्तनपुरावृत्तं संस्कृतं चानया दृष्ट्याऽन्योऽन्यस्य पूरके स्तः। पुरातनाः अभिलेखाः प्रायेण देववाण्यां सन्ति। अस्य कारणमेतद्यच्चिरकाल यावद् भारतस्य राज्येषु सुरगिरः प्रयोगो राजभाषारूपेणाभवन्निरन्तरम्। ज्ञानस्य विज्ञानस्य बुद्धिमतां च भाषारूपे संस्कृतस्य प्रतिष्ठा सप्तदशीमष्टादशीं शतीं यावत् बलृप्ताऽऽसीत् सततम्। प्रत्नानामनुकृतीनां चित्रेत्यादीनां ज्ञानमधिगन्तुं संस्कृतग्रन्थेषु तेषां वर्णनानि वैशिष्ट्येन सहायकानि। अजन्ताएलोरयोरधिकांशानां भित्तिचित्राणां मूर्तिशिल्पानां च ज्ञानं तेभ्योऽतिसरलं वर्तते। यैः संस्कृतग्रन्थेषु तेषां वर्णनानि पठितानि सन्ति, उत वा तेषामध्ययनस्य क्षमत्वं येषु विद्यते। संस्कृतस्य मूलग्रन्थानामध्ययनेन विना मात्रानुवादस्याधारे प्राचीनेतिहास-सम्बन्धिनो ये निष्कर्षाः निष्काल्यन्ते, ते सन्देहरहिताः भवितुं न शक्यन्ते।

अभिप्रायोऽयं सर्वैः स्वीकार्यो यद् विश्वस्य पुस्तकालयस्य सर्वपुरातनं पुस्तकमृग्वेदः। यस्य भाषा देववाण्याहोस्वित् संस्कृतं विद्यते। वेदा एव नहि, अपितु प्राचीनानामार्याणां यावदपि साहित्यं पुरावृत्तं च, तत्सर्वं सुरगिरो वर्तते। वेदानामुपवेदानां ब्राह्मणानामुपनिषदां वेदाङ्गानां पुराणादिकानां शाखानामुपशाखानां च सहस्राधिकाः ग्रन्थाः रामायणं, महाभारतं, भासस्य कालिदासादिकलौकिक-कवीनां च नाटकानि महाकाव्यानि च सर्वाण्येव प्राक्तन-पुरावृत्तस्य स्पष्टं चित्रणं प्रस्तुवन्ति।

प्राचीनभारतस्य भारतीयानां च विषये परिचयप्रापणस्यैकमात्र साधनं संस्कृतमेव, यतस्तेषां समग्रं समस्तं पुरावृत्तं, धर्मः, संस्कृतिः, सभ्यतेत्यादिसर्वस्वमस्मिन्नेव सुसम्पृक्तं वर्तते। खगोल-तिथि-नक्षत्र-फलित-विद्यासम्बन्धि ज्योतिःशास्त्रं प्राचीनं भाण्डारं सर्वाधिकं देववाण्याम्। आयुर्वेदस्य सम्पूर्णं समग्र विज्ञानं संस्कृते एव। ब्रह्ममहापुराणे, शिवपुराणे, भागवतमहापुराणे, नारदमहापुराणे, मार्कण्डेयमहापुराणे, अग्निमहापुराणे, भविष्यमहापुराणे, ब्रह्मवैवर्तमहापुराणे, लिङ्गमहापुराणे,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाराहमहापुराणे, स्कन्दमहापुराणे, वामनमहापुराणे, कूर्ममहापुराणे, मत्स्यमहापुराणे, गरुड़महापुराणे, ब्रह्माण्डमहापुराणे, वायुमहापुराणे, विष्णुधर्मोत्तरमहापुराणे, हरिवंशपुराणे, देवीभागवतमहापुराणे, एकाग्रेपुराणे, वासुकिपुराणे च वर्णितं प्राक्तनं पुरावृत्तं गीर्वाणवाण्यामेव तु वर्तते।

आदिमलोककथानामाधारे आदिमग्रन्थस्य 'ऋग्वेदस्य' रचनं जातम्। ऋग्वेदेऽस्मदीयप्राचीनेतिहासस्यैकाधिकानि तथ्यानि व्यञ्ज्यन्ते। नास्ति तत्र कोऽपि सन्देहो यद् ऋग्वेदो ज्ञातविश्वसाहित्यस्य प्राचीनतमं पुस्तकम्। परं वैदिकी संस्कृतिर्मानवसमाजस्याद्या संस्कृतिर्न वरीवर्ति। एतत्पूर्वं यामृतवरुणसभ्यतां वय जानीमहे, तस्याः सम्पूर्णं विवरणं देववाण्यां विद्यते। प्रथमो भाषावैज्ञानिको यास्कोऽस्ति यस्य निरुक्ते ग्रन्थे भाषां प्रति पूर्णतो वैज्ञानिको दृष्टिकोणः प्रस्तुतोऽस्ति। अयं ग्रन्थोऽपि संस्कृते वर्तते, प्राचीनभाषायाश्चैतिहासिकपरम्परां प्रकटयति। सुरगिरः प्रसिद्धतमानां कालिदासप्रभृतिकवीनां ग्रन्थेष्वस्माकं प्राचीनेतिहासस्य यादृशं सुव्यक्तं रूपं सामाजिक-राजनैतिकार्थिकदृष्टिभिर्लक्ष्यते, तादृशमन्यत्र न प्राप्यते।

संस्कृतसाहित्यस्य समारम्भो गद्यपद्ययोरुभयोः क्षेत्रयोर्हिन्दीभाषावदर्वाचीनो नास्ति, प्रत्युतास्य परम्पराऽस्मात् कालात् कतिपयसहस्रवर्षपूर्वं वैदिकयुगात् सगतिका वर्तते सततम्। परिनिष्ठितलौकिकसंस्कृतसाहित्यस्य स्वरूपोपलब्धिः रामायणमहाभारतकालादेव। भास-कालिदासाश्वघोषपर्यन्तं प्रापणे विकासस्य पूर्णप्रौढ़त्वं परिलक्ष्यते। यत्र तस्मिन् समये सुरगिरौ महाकाव्यानि नाटकानि च विशेषरूपेणावलोक्यन्ते, तत्र चम्पूकाव्यानामपि रूपं प्राप्यते। नलचम्पू-मदालसाचम्पू-जीवनधरचम्पू-यशस्तिलकचम्पू-रामायणचम्पू-आदिकेषु काव्येष्वाकं प्राक्तनं पुरावृत्तं सुरक्षितं विद्यते।

सर्वाणि पुराणानि भारतीय-जीवनस्य सांस्कृतिकनिधयः सन्ति। संस्कृतं वस्तुतो भारतस्य जीवनम्। संस्कृतमेव हि भारतम्। देववाण्याः ज्ञानेन विना भारतीयेतिहासस्यैवं संस्कृतेस्तथा च तस्याः मूलभावस्यावबोधनमसम्भवम्। गीर्वाणवाणी विश्वभाषाऽऽसीदस्ति भविष्यति च। संस्कृतेन प्राचीनकालादेव संसारायानेकासां विद्यानां ज्ञानं प्रदत्तम्। वेदेषु गणित-विज्ञान-ज्योतिःशास्त्र-भूगोल-खगोलशास्त्रादि – वह्वीनां बीजानि विद्यन्ते। प्राचीनभारतीयभूगोलस्य ज्ञानमधिगन्तुमपि संस्कृतस्य ज्ञानमावश्यकम्। वस्तुतस्त्वतीतं प्रति ज्ञानेच्छयैवेतिहासस्य पुराणानां चोद्भावनं विहितम्। मानवः स्वव्यतीतमधिकाधिकं ज्ञातुमिच्छुको भवति। अत एव दिनमनुदिनमितिहासस्यानेकानि नवीनानि तथ्यान्युद्घाट्यन्ते सततम्। पुरातत्त्वादतिरिक्तं प्राचीनेतिहासज्ञानस्य साधनं पुरातनं साहित्यमप्यस्ति। यदापर्यन्तं प्राचीनभारतज्ञानस्य विप्रच्छिषा मानवमनसि जागरिता भविष्यति निरन्तरं, तदापर्यन्तं संस्कृतस्य प्रासङ्गिकता स्थास्यति।

प्राक्तनपुरावृत्तस्य संस्कृतेश्च ज्ञानं पुरातत्त्वेनापि भवितुं पार्यते, परं पुरातत्त्वेन ज्ञातानि तथ्यानि साहित्येन ज्ञातानां तथ्यानामिव सन्देहरहितानि न भवन्ति। इयदवश्यं यत् यदाकदाचिदित्थमपि जायते, यदा साहित्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातानां तथ्यानां पुष्टिः पुरातत्त्वेनापि भवति। आचार्येण बलदेव-उपाध्यायेन 'संस्कृत-साहित्य का इतिहास' इत्यस्मिन् पुस्तके लिखितमस्ति —

'अद्यत्वे निजोच्चसभ्यतायां गर्वकर्त्र्यो जातयो यदाऽरण्येऽवटित्वाऽटित्वा केवलं सङ्केत-मात्रेणैव स्वमनोगतभावान् प्रकटयन्ति स्म, तस्मिन् काले आहोस्वित् तस्मादप्यतिपूर्वमस्माकं पूजनीयाः पूर्वजाः आर्यजनाः अनयैव देववाण्या सरस्वत्यास्तटे भगवतो विभूतीनां पूजायां रहस्य-युक्तानामृचामुच्चारण सरससाम्नां च सस्वरा-लपनं कुर्वन्ति स्म।"

उद्धरणेनानेनेदं सुव्यज्यते यदस्माकं पुरावृत्त यावत् प्राचीनं, तावत्येव पुरातन्यस्मदीया देववाण्युत वा संस्कृतभाषा। पशूनां खगानां चाख्यानानां माध्यमेन निखिलजगन्नीतिकथाश्रावकं पञ्चतन्त्रं, यौनविषयकशिक्षाप्रदायक कामशास्त्रं, लोकव्यवहारस्य सुविस्तृतज्ञानदायकं सर्वस्य महच्छास्त्रं महाभारतं, जगतो वैयाकरणानां विस्मापकं पाणिनीयं व्याकरणमादिकानि पुस्तकानि कस्याञ्चिदन्यस्यां भाषायां न लप्स्यन्ते। अनेन प्रकारेण संस्कृतसाहित्यस्य विकासात्मकं रूपं पश्येम वयं चेत्तर्ह्यस्माभिः सुस्पष्टं ज्ञायते यदस्माकं प्राक्तनपुरावृत्तं कोदृशमवर्तत।

यदाप्रभृति मानवोऽस्यां धरित्र्यां जन्मालभत, तत एव प्रभृति हिमालयो भारतस्योत्तरस्यां दिश्यवस्थितोऽस्ति। हिमालयस्य प्राचीनत्वमिति-हासज्ञा अपि स्वीकर्तुं प्रवर्तन्ते। तस्यैव हिमालयस्य वर्णनमस्माकं प्राचीनतमे ऋग्वेद 'इत्याख्ये' पुस्तके एवं प्रकारेण प्राप्यते —

'यस्मै हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्य येमाः प्रदिशो यस्य बाहुः॥'

अर्थाद् हिमालयाद् याः नद्यो निस्सरन्ति, ताः रज्जुवद् दीर्घानि लघूनि सलिलस्य स्रोतांसि सन्ति, यानि समुद्रे मिलन्ति। केनोपनिषदि, महाभारते, कुमारसम्भवे, मेघदूते, रघुवंशे, मुद्राराक्षसे, अर्थशास्त्रे, किरातार्जुनीये आदिष्वनेकेषु संस्कृतग्रन्थेष्वपि हिमालस्य वर्णनं लभ्यते। श्रीमद्भगवद्गीता सर्वासामुपनिषदां पुराणानां, स्मृतीनामेवं शास्त्राणां सारभूतं पावनं धर्मपुस्तकं मन्यते। अस्याः निर्देशोऽन्ताराष्ट्रियस्तरे जातोऽस्ति। अनयाऽस्माकं प्राक्तनपुरावृत्तस्य संस्कृतेश्चोज्ज्वलं रूपं व्यञ्ज्यते। एतदेव कारणं यद् विश्वविश्रुतैर्महद्भिर्मनीषिभिरयमेव पावनो ग्रन्थोऽनुकरणार्हो विहितः। येषां प्रमुखानां संस्कृतसाहितीकाराणां रचनासु प्राचीनेतिहासस्ये-षदभिव्यक्तयोऽधिगम्यन्ते, तेषां नामानि सन्ति-अश्वघोषः, आर्यशूरः, कल्हणः, कालिदासः, कुमारदासः, जगन्नाथः पण्डितराजः, जयदेवस्त्रि-विक्रमभट्टो, दण्डी, नारायणपण्डितो बाणभट्टो भट्टनारायणो भवभूतिर्भारविर्भासो माघो रत्नाकरो राजशेखरो वाल्मीकि विशाखदत्तो विष्णुशर्मा, शूद्रकः, श्रीहर्षः, सुबन्धुर्हर्षवर्धनो हेमचन्द्रश्च।

सुरगिरौ केचिदेतादृशा अपि ग्रन्थाः विद्यन्ते, येऽस्माभिरैतिहासिकदृष्ट्या परीक्षितुं पार्यन्ते। एवंविधेषु पुस्तकेषु कानिचित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धान्यभिधानान्येवंविधानि वर्तन्ते-

बुद्धचरितं, शारिपुत्रप्रकरणं, जातकमाला, राजतरङ्गिणी, मालविकाग्निमित्रं, रघुवंशं, जगदाभरणं, गीतगोविन्दं, दशकुमारचरितं, हर्षचरितं, कादम्बरी, वेणीसंहारः, उत्तररामचरितं, किरातार्जुनीयं, प्रतिज्ञायौगन्धरायणं, शिशुपालवधं, रामायणं, मृच्छकटिकं, नैषधीयचरितं, वासवदत्ता रत्नावली च ।

यस्य भारतस्य विषये वयं सदैव गर्वमनुभवामस्तस्य तीर्थादिकस्थानानां विषये परिचयात्मकाः सङ्केताः प्राचीनसाहित्ये यत्र तत्र विप्रकीर्णाः विद्यन्ते । मानवसमाजनिर्माणे संस्कृतस्य योगदानं सर्वविदितम् । राष्ट्रियैक्यस्य दृष्ट्या संस्कृतस्योपयोगित्वमस्वीकर्तुं न शक्यते । चित्तसंस्कारस्य दृशा संस्कृतस्य महत्त्वं वयं कदापि विस्मर्तुं न शक्नुमः । विश्वबन्धुत्वस्य दृक्पातेन संस्कृतस्य गौरवं प्राचीनकालादक्षुण्णं सगतिकं भूयते सततम् । संस्कारस्यावलोकनेन संस्कृतस्य महिमानं कोऽप्यस्वीकर्तुं न पारयति ।

अन्ततो वयमिदमेव व्याहर्तुमेष्यामो यदमाकं प्राक्तनपुरावृत्तं देववाण्या सहैकाकारम् । अस्माभिः स्वकीयप्राचीनेतिवृत्तस्य सुस्पष्टः परिचयः प्रापणीयो भूयते चेत्तर्हि संस्कृतस्याश्रयो ग्रहीतव्यो भविष्यत्येव । यद्यप्यद्यत्वे देववाणी मृतभाषोद्घोष्यते तथापीयं भाषाऽन्यासां सर्वासामेव भाषाणां जन्मदात्री वर्तते, वृत्तमेतन्नास्वीकर्तुं शक्यते । देववाण्यै लोकप्रियत्वप्रदानस्यैक एव प्रमुख उपायो यद् वयं स्वकीयस्य प्राक्तनपुरावृत्तस्य प्रामाणिकेष्वर्थेषु ज्ञानस्य रुचिर्वर्धयेमेति ।

★

गलज्जलिका[1]

❋ बुद्धिं नमामः ❋

—डा० राजेन्द्रमिश्रः
आचार्यः विभागाध्यक्षश्च संस्कृतविभागे
हिमाचलप्रदेशविश्वविद्यालयः, शिमला-५

परप्रत्ययोन्नेयबुद्धिं नमामः ।
समाधेय-वैधेयबुद्धिं नमामः ॥१॥

भृशं तर्पितां शोणितैस्तापसानाम् ।
दशग्रीवलङ्का-समृद्धिं नमामः ॥२॥

जगत्पावनं जन्ममात्रेण यस्याः ।
विदेहात्मजा-वह्निशुद्धिं नमामः ॥३॥

फलैश्छायया चाऽपि योऽभूद् दरिद्रः ।
तरोस्तस्य तालस्य वृद्धिं नमामः ॥४॥

विधुं चुम्बितुं भूरि रिङ्गत-तरङ्गैः ।
मुधोत्कण्ठितं कातराब्धिं नमामः ॥५॥

भ्रमन् ग्राम-रथ्यासु जातोऽसि मन्त्री ।
ध्रुवं तावकीं तन्त्रसिद्धिं नमामः ॥६॥

अविन्दोऽध्वनि क्षुण्णनेत्रोऽपि लावम् ।
प्रशस्तामनायास-लब्धिं नमामः ॥७॥

गजं प्रेक्ष्य यद् बुक्कति ग्रामसिंहः ।
अहो तस्य दीनस्य क्षुब्धिं नमामः ॥८॥

विनिन्द्यैव ये देववाणीं प्रसन्नाः ।
जडानां नु तेषां महर्धिं नमामः ॥९॥

●

१- 'गजल' इति हिन्दीभाषायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायणस्य वैदिकव्याख्यापद्धतिः

—श्री हेरम्बपाण्डेयः
एन १/३०, ए-६, नगवा, वाराणसी-५ (उ०प्र०)

वैदिकव्याख्यातृषु आचार्यसायणस्य नाम विशेषरूपेण उल्लेखनीयम् अस्ति। सायणाचार्यः स्वभाष्ये सर्वत्र प्राचीनपरम्परागतार्थान् आश्रित्य व्याख्यां करोति। स स्वभाष्याय पुराणेतिहास-स्मृतिमहाभारतादिग्रन्थैः प्रमाणानि प्रस्तौति। स वैदिकमन्त्राणाम् आध्यात्मिकदृष्ट्या, आधिदैविकदृष्ट्या, आधिभौतिकदृष्ट्या च अर्थम् अकरोत्। स यथास्थानं त्रयाणामर्थानाम् उल्लेखमकरोत्। वेदार्थाय परमावश्यकानि षडङ्गानि सन्ति, तेषां सायणो मर्मज्ञ आसीत्। वेदेषु प्राप्तानि समाधिभाषायाः, परकीय-भाषायाः लौकिकभाषायाश्च रहस्यानि स स्वभाष्ये यथास्थानं प्रकटीकरोति।

स प्रत्येकमहत्त्वपूर्णशब्दस्य व्युत्पत्तिं सिद्धिं स्वराघातं च पाणिनीयव्याकरणरीत्या, प्रातिशाख्यरीत्या च व्यवस्थितरूपे प्रकाशयति। निरुक्तमपि प्रायः उद्धरति। यास्कव्याख्यात-मन्त्राणां व्याख्यास्तेषु तेषु स्थानेषु समुद्घाटयति। एतदतिरिक्तं स माधवस्कन्दस्वामिप्रभृत्याचार्याणां मतान्यपि श्रयति। स स्वभाष्ये कल्पसूत्राणां प्रयोगं विस्तृतरूपेण करोति। सूक्तव्याख्यायाः प्रारम्भे स सूक्तस्य विनियोगस्य ऋषेः देवतायाश्च निरूपणं प्रामाणिकग्रन्थानाश्रित्य सर्वत्र करोति। सूक्तसम्बद्धाम् आख्यायिकामपि सप्रमाणं निर्दिशति। मीमांसासम्बद्धं रहस्यमपि भाष्ये यथास्थानम् उन्मीलयति।

वेदस्य सिद्धान्तानां प्रतिपादनं, रहस्यानाम् उद्घाटनं च स उपोद्घाते सम्यक्रूपेण करोति। सायणो 'यद्वा' इति वचनेन परपक्षम् उपस्थापयति। स वैदिकमन्त्राणां व्याख्या कर्मकाण्डदृष्ट्या करोति, यतः तस्मिन् काले यज्ञस्य विशिष्टं महत्त्वम् आसीत्। एवं सायणाचार्यो 'याज्ञिक-पद्धतिं' स्वभाष्ये स्थापयति।

सायणाचार्यः पञ्चसंहितानां त्रयोदश-ब्राह्मणारण्यकानां च व्याख्यां लिखितवान्। स सर्वप्रथमं कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः भाष्यम् अलिखत्। यद् आपस्तम्बसंहिताभाष्यमपि कथ्यते। सायणो न केवलं विद्वान् भाष्यकार आसीत् अपितु प्रशासकोऽप्यासीत्। स विजय-नगरसाम्राज्यस्य अमात्यपदे प्रतिष्ठित आसीत्। स तैत्तिरीयसंहितायाः व्याख्यायाः पश्चात् क्रमशः ऋग्वेदसंहितायाः, सामवेद-सहितायाः शुक्लयजुर्वेदीय, काण्वसंहितायाः अथर्ववेदसंहितायाश्च भाष्यं विरचितवान्। सायणस्य अग्रजः माधवाचार्योऽपि महान् विद्वान् आसीत्। विजयनगरस्य राजा सर्वप्रथमं तमेव वेदभाष्य-विरचनायादिदेश, परन्तु समयाभावेन सः भाष्यं कर्तुं न शशाक, अतः तत् कार्यं सायणः कृतवान्। सायण-कृतवैदिकभाष्यं **'माधवीयभाष्यम्'** इति नाम्ना प्रसिद्धमस्ति। सायणस्य जन्म १३१५ ईसवीय-वत्सरे अभवत्। यूरोपदेशीयः मैक्समूलर–महोदयः सायणभाष्यस्य सन्दर्भे स्वविचारान् एवं प्रतिपादयति—

We ought to bear in mind that five and twenty year ago, we could not have made even our first steps, we could never at least have gained a firm footing without his leading strings[1].

★

१– श्री पं० बलदेव उपाध्याय, वैदिकसाहित्य और संस्कृति, पृ० ८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामवेदमन्त्रात्मकं काव्यम् (९)

—कवितार्किकः श्री सन्तरामशास्त्री
३६४/६, न्यू टाउन, मोगा-१४२००१ (पञ्जाब)

ओ३म् आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
सखायः स्तोमवाहसः ॥

—सामवेद २/५/१०

(२०३)

सर्वज्ञपूर्णः सविता जनाना-
मुत्पादको देहभृतां सखेव ।
स्नेहप्लुताक्षः परिपाति सर्वा-
नतः प्रगायन्तु पुनः पुनस्तम् ॥

(२०४)

प्रज्ञान-दीप्त्या मनसां निविष्टः
जन्मादिदुःखं विनिवारकोऽसौ ।
ध्येयः प्रगेयो ननु दत्त-चित्तै-
र्विद्वद्भिरेषः करुणावतारः ॥

(२०५)

स्नेहाश्रुपूर्णा विनयेन दीनाः
श्रद्धान्विता भावभरा नितान्तम् ।
सर्वे मिलित्वा-समवाय योगे
गायन्त्वभीक्ष्णं स्तुतिभिस्तमिन्द्रम् ॥

(२०६)

समानशीला गुणकर्मतुल्याः
सर्वे सखायस्त्वरितं समेत्य ।
दत्तावधाना उपविश्य चात्र
गायन्तु चेन्द्रं स्वरतालयुक्ताः ॥

(२०७)

संसाधकाः स्वस्तुतिभिस्तमिन्द्रं
समाह्वयन्तो रसरागरक्ताः ।
संसारचिन्तां परितो विहाय
गायन्तु गायन्तु तमेव चाद्यम् ।

ओ३म् दोषो आगाद् बृहद्गाय द्युमद् गामन्नाथर्वण ।
स्तुहि देवं सवितारम् ॥

--सामवेद २/७/३

(२०८)

प्रत्येतुमीशं ननु साधकस्त्वं
बद्धाञ्जलिः प्रेमपरः प्रसन्नः ।
तारस्वरेणैकमना प्रशस्तं
निशाऽऽगता सायमथ प्रगाय ॥

(२०९)

प्रत्येतुमीशं स्थिरचित्तवृत्त्या
उपासकस्त्वं सवितारमेकम् ।
वारं हि वारं मनसा प्रतुष्टः
वेदानुवाकैर्नितरां प्रगाय ॥

(२१०)

सूर्यास्तकालः समुपागतो हि
उत्थाय नूनं सविताख्य-देवम् ।
विवृद्धभक्त्या विमलाशयस्त्वं
सुमन्त्रसूक्तैर्विशदं प्रगाय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२११)

नारायणं नीरजयोनिमाद्यं
विभुं परेशं स्थितधीः प्रभूय ।
प्रेमाम्बुधिस्नात इवाश्रुधारैः
गेयं प्रगेयं सततं प्रजेशम् ॥

(२१२)

नियम्य सम्यग् मन इन्द्रियार्थान्
निधाय चित्ते सविताख्यदेवम् ।
अन्त.प्रविष्टं प्रभुमात्मरूपं
स्तुत्यः सदा सर्वगुणैरगम्यम् ॥

(२१३)

उपासकाः प्रेमपरा विरक्ताः
प्रवृद्ध-भक्त्या पुरुषं पुराणम् ।
तमात्मतन्त्रं जगदैकहेतुं
श्रद्धान्विताच्च स्तुतिभिः प्रणेयुः ॥

(२१४)

सत्वंकनिष्ठाः भगवत्प्रपन्नाः
विमुक्तसङ्गा परमात्मलीनाः ।
तत् कीर्तनध्वस्तमनो मलञ्च
गायन्तु तन्नाम पुनः पुनश्च ॥

ओ३म् एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
स्तुषे वामश्विना बृहत् ॥

—सामवेद २/७/४

(२१५)

दिदृक्षवस्तस्य विचित्र-मायां
वाताम्बुपर्णाशन –पूतदेहाः ।
पद्मासनस्था नरपुङ्गवास्ते
ध्यायन्त्यरण्ये सततं तमेव ॥

(२१६)

प्रभात-काले उषसः समेषां
मनोऽन्धकारं व्यपने प्रसक्ताः ।
विद्रावितोऽज्ञानतमः समस्तं
स्वरश्मिपूगैः परिदीप्तितश्च ॥

(२१७)

प्रभात-काले उषसः प्रकाशे
ध्याने निमग्नाः परिचिन्त्यमानाः ।
एकाग्रवृत्त्या परमात्म-तत्त्वं
पश्यन्ति पूर्णं सविताख्यदेवम् ॥

(२१८)

उषाप्रकाशे वितते प्रभाते
विशुद्धचित्ता मुनयो नितान्तम् ।
प्रस्तोतुमाद्यं सर्वताख्यदेवं
प्रणेयु बद्धाञ्जलयो विनम्राः ॥

(२१९)

समाहितात्मा नियतं हि लोके
समीक्षितुं कामदुघाङ्घ्रिपद्मम् ।
मनो वचोभिः सविता-स्वरूपं
संवर्णयन्ति प्रेमपरिप्लुप्ताक्षाः ॥

(२२०)

उषा नवीना निजकान्तिपुञ्जैः
सम्मोहितुं सर्वजनान् प्रभाते ।
प्रिया प्रिया चाति सुशोभमाना
चात्यन्त-शुद्धा जनहर्षदा वै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२२१)

अस्मिन् सुकाले प्रभुमर्चमाना
अलौकिकानन्दयुताः सहर्षम् ।
तद्दर्शनार्थं मनसा प्रवृत्ताः
समाप्नुवन्ति प्रभुमात्मदृष्ट्या ॥

(२२२)

एषैव चोषा विभुमर्चतानां
मोहान्धकारं परितो निरस्य ।
वेदप्रकाशं विदधाति चेत्थं
तेनैव मर्त्यो भव-पारयेति ॥

(२२३)

नक्तं दिवं प्राणमपानवायु
उभे च सन्ध्ये सततं विनम्रः ।
सम्प्रार्थयेऽहं भवतां कृतज्ञः
संयोगमाप्यैव तमाप्तुमुत्कः ॥

ओ३म् यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
न किः स दभ्यते जनः ॥

—सामवेद २/८/१

(२२४)

करोति रक्षां वरुणो हि यस्य
न कोऽपि तं पीड़यितुं समर्थः ।
संरक्षितोऽसौ वरणीय तेन
संरक्षितो येन समस्त-विश्वम् ॥

(२२५)

प्रकृष्ट-रूपेण सचेतको हि
यस्यास्ति संरक्षक एव दिव्यः ।
नूनं स लोके नियतं हि तेन
संरक्षकस्तिष्ठति सर्वदैव ॥

(२२६)

रिरक्षिषो यस्य सदा हि मित्रोऽ-
र्यमा तथा प्रेमपरः प्रचेता ।
हन्तुं न तं कोऽपि नरोऽथ चान्यः
शक्तो यतो दैवसुरक्षितोऽसौ ॥

(२२७)

यस्यास्ति गोप्ता करुणावतारः
स निर्भयो धीरमना मनस्वी ।
सर्वत्र भूमी-वलये सगर्व-
मितस्ततो गच्छति सर्व-काले ॥

(२२८)

'अरक्षितं तिष्ठति दैव-रक्षितं
सुरक्षितं दैवहतो विनश्यति ।'
विचिन्त्य चैवं निरहंकृतिर्यदा
नरस्तमेवात्र विजानतः प्रभुम् ॥

(२२९)

यमैरकामैर्नियमैर्नियम्य
मनः स्वकीयं परितो विमृश्य ।
सर्वात्मना तं प्रणिधाय चित्ते
प्रसादयेच्चारुतरं प्रशान्तः ॥

ओ३म् क इमं नाहुषीष्वा इन्द्रं सोमस्य तर्पयात् ।
स नो वसून्या भरात् ॥

—सामवेद २/८/६

(२३०)

इन्द्रः सदा नो धनवैभवा हि
संयच्छतीति प्रविलोक्यते च ।
किन्त्वेनमिन्द्रं मनुज—व्रजेषु
प्रीणाति कस्तं निज-भक्ति-भावैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२३१)

परं प्रसन्नः स परात्मदेवः
स्वोपासकायाखिलचैच्छिनं हि।
सम्पूर्णमैश्वर्यमथान्यवत्मं
संयच्छति प्रेमपरः परेशः॥

(२३२)

विद्याधनं सौख्य-सुसाधकं हि
कस्तं स्व-भक्त्या परितोषयेच्च।
विभूक्षितः सोमरसस्य तस्य
नान्यत् स्पृहा कापि निरञ्जनस्य॥

(२३३)

स केवलं भक्ति-भरात्मचित्तं
जानाति सत्यं निजसेवकं तम्।
अतः स सेव्यो नियतं मनुष्यै-
र्वशीकृतस्तैरनुवर्तते च॥

ओ३म् आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः।
न त्वामिन्द्राति रिच्यते॥

—साम० २/६/४

(२३४)

समुद्रमाविश्य यथा हि नद्यः
समुद्र-रूपा प्रभवन्ति लोके।
तथैव भक्ताः प्रभुभक्तिमग्नाः
समाप्नुवन्ति प्रभुरूपमेव॥

(२३५)

संनियम्येन्द्रिय-ग्रामं प्रभुभक्तिपरायणाः।
प्रभुरूपा भवन्तीह सिन्धुमिवापगा यथा॥

(२३६)

ज्ञाने तथा बुद्धि-बले न कोऽपि
त्वत्तोऽधिको वा सदृशस्त्वदीयम्।
ज्ञानाग्रगण्या प्रविशन्ति तस्मात्
त्वय्यप्रमेये मुदिताननाश्च॥

(२३७)

परेशभक्त्यामभिदत्त-चित्ताः
विज्ञाय सर्वं परमात्मरूपम्।
स्व-नामरूपं परिहाय नूनं
व्रजन्ति ते तन्मयतां जगत्याम्॥

(२३८)

तं ज्ञान-विज्ञान-निधि महान्तं
सञ्चालकं संसृति-चक्रमेकम्।
संचिन्त्यमाना मनसि प्रसन्नाः
रूपे तदीये परिवर्तयन्ति॥

(२३९)

परेऽमले ब्रह्मणि दत्त-चित्ताः
सोमाख्यभक्त्या परमात्म-देवम्।
सम्प्राप्य तद्रूपमवाप्नुवन्ति
समुद्रमाविश्य यथा हि नद्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेत-माधव-वृत्तम् (२)

—डॉ० निरञ्जनमिश्रः, प्राध्यापकः
भगवानदास-केन्द्रीय-आदर्शसंस्कृतमहाविद्यालयस्य
प्राचीनावधूतमण्डलाश्रमः, हरिद्वारम् (उ०प्र०)

(७)

तेषु प्राप्तमनोरथेषु सुजनः श्रव्यं वचस्त्वब्रवीत्
आदौ मे नमनं त्वदीयपदयोर्येनास्म्यहं नायकः।
या नीतिः प्रतिबोधिता निजमुखेनास्मत्प्रियाबोधिनी
सा नित्यं निजनर्तनैः फलवती, 'नीतिं' नमामि प्रियाम्॥

(८)

यावत् वक्तुं प्रभवति पुनस्तावदेका सुबाला
नेत्रप्रान्तैः समधुकलशा मोहयन्ति सभास्थान्।
नान्यं कामं रुचिरवसनैः रक्षति स्म प्ररूढ़म्
साहित्यज्ञः कथयति यथा व्यञ्जना रक्षणाय॥

(९)

सिंहागारे मृदुलवदना चञ्चला सा कुरङ्गी
निर्भीता तान्नयनविषयान्घातयन्ती स्वभावैः।
एकैकं संयमितगतिका पाययन्ती बभूव
नेत्रप्रान्तैर्वदनमदिरां भावपूर्णां मधूनि॥

(१०)

नीतावस्थां भवति विषमावृत्तिरेवं न चित्रं
ज्ञातुं कश्चित्प्रभवति न वै को बली निर्बलः कः।
धन्या नीतिर्भवति कृपया यत्र सर्वे समानाः
सिंहस्याङ्के विशति हरिणी किं प्रमाणं ततोऽन्यत्॥

(११)

पीत्वा कामकषायितो मधुमुखीं हालाञ्च बुद्धिप्रदां
वक्तुञ्चोत्सुकमानसोऽपि नयनान्नो मुञ्चति प्रीतिदाम्।
सङ्केतं समवाप्य मुग्धवदनो वक्तुं यदा प्रारभत्
तावत्सा मृगलोचना यदुपतेरङ्कं समालिङ्गयत्॥

(१२)

हे मे तात ! मया कृतं जनपदे स्नेहान्वितं गायनं
दोषास्तत्र च दर्शिताः गुणनिधौ संभाविताः नो गुणाः।
सर्वे ते हतबुद्धयो गतमतिं श्रुत्वा तु मां हर्षिताः
राज्ञां पश्यति दोषपूर्णविषयं नो वै गुणं सुप्रजाः॥

(१३)

स्वतन्त्रो तन्त्रोऽयं प्रचलति जनानां करबलात्
जयश्रीर्नेतव्या भवतु शुभकार्यैरशुभजैः।
जनानां न ज्ञानं, गुणनिधिरयं वाऽगुणनिधिः
पदं पूजास्थानं पदिषु न च लिङ्गं न च वयः॥

[अथ भाषणम्]

(१४)

मुक्ताकाशतले वसन्ति सततं किं ते न मे भ्रातरः
पश्यध्वं नयरक्षणं नरपतेर्वातानुकूले स्वयम्।
भोज्यञ्चाप्यपहाय यान्ति शयनं शिक्षाविहीनात्मजाः
नास्त्यस्यात्र विचारणा कथमहो राज्ये स्थितिः कीदृशी ?॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१५)

नित्यं स्वेदकणाभिसिक्तधरणीमालोक्य ये हर्षिताः
शीते वा तरुणातपे श्रमरताः रात्रिन्दिवं जीवने ।
तेषां रूपमिदं प्रघर्षति मनः कंकालशेषात्मकं
नित्यं नाशमुपैति कार्यनिरतश्चान्यः सदा वर्द्धनम् ।।

(१६)

राजाऽसौ जनतोपचारनिरतः किं वा सदा भक्षणे
उच्चस्थानमवाप्य काककुलजो किं वा कपोतो भवेत् ।
आचार्यत्वमवाप्य नीतिनिपुणाः सन्त्यात्र गेहमाश्रयाः
पुत्रत्वं समावाप्य वित्तविदुषां राज्यस्थितो वर्तते ।।

(१७)

दौर्भाग्यं मम भारतस्य यदियं राज्यस्थितिर्वर्तते
किं कालः समुपागतोऽस्त्यसमये तोमावृतश्चार्यमा ।
नक्षत्राधिप ! मुञ्च मुञ्च गगनं ज्वालातिपातं कुरु
येनासौ नयरक्षको भुवि तले भस्मावशेषो भवेत् ।।

(१८)

हिन्दुत्वं न हि मन्दिरं प्रविशति द्वारि स्थितो रक्षकः
राजाज्ञा किल नर्तकीव निकषा द्रव्यात्मकं गच्छति ।
निर्दोषो भवतीह दुष्टचरितो दोषी विमुक्तस्तदा
नेत्रे धारितपट्टिका भगवती हस्ते तुलां बिभ्रति ।।

(१९)

नूनं पातय दुर्जनं नरपति राज्ञासनान्मे शृणु
अन्यं कार्यविधायक निजजनं तत्रासनस्थं कुरु ।
सङ्घे शक्तिरिति प्रतीतिविषयं जानन्ति ये सज्जनाः
ते नित्यं परिवर्तयन्ति पुरुषं राजासनस्थं नु किम् ।।

(२०)

श्रुत्वा तैर्मम भाषणं करतलध्वानैः कृतं गर्जनं
ज्ञाता नीतिरियं कदापि विफला नैवेति, मे चिन्तनम् ।
तस्यैवात्र फलं, प्रफुल्लमनसा पश्यामि यत् कौतुकं
काचिच्चन्द्रमुखी सुवर्णलतिका पार्श्वस्थिता वर्तते ।।

(२१)

नूनं शाश्वतनायकोऽस्ति, जनता ते पूजनं दास्यति
मुख्यस्याल्पवचो निशम्य मनसा सर्वे तदा मादिताः ।
हर्षान् कञ्चनकामिनीं स्वमदिरादानार्थमेवादिशन्
अङ्गञ्चापि विमोहकं विवसनं कर्तुं तदाऽप्रेरयन् ।।

(२२)

दृष्ट्वा तत्र पयोधरार्धकलिकां स्पृष्ट्वा कपोलद्वयं
बाहौ तामुपवेश्य राजरमणी हालाहलञ्चापिबन् ।
सापि व्याप्तमनोभवप्रमुदिता तेषां करस्पर्शनात्
जाता तत्र सुराङ्गना सुरसभामामोदयन्ती शुभा ।।

(२३)

तेष्वेको निजकार्यकौशलमिदं वक्तुं पुनः प्रारभत्
अन्ये श्रोतुमुपागतास्सुमतयः शिष्याः यथा वै गुरोः ।
नाहं माधव ! भाषणेन विजयी दण्डस्वरूपोऽभवं
विद्या चाप्यफला क्वचित् भवति वै दण्डात्मिका नाफला ।।

(२४)

ग्रामे सज्जन-ताड़नं प्रतिपदं दिव्यप्रभास्थापन-
ञ्चाकाले कलिकाविमर्दनमिति स्वीयैः जनैस्साधितम् ।
दृष्ट्वा दुष्टजनानुकूलगतिकं, भीत्या समे सङ्गता
पूजायां प्रथमस्सदा भवति वै नो सज्जनो दुर्जनः ।।

(२५)

ये ये मे शरणागतास्सुनियतास्तेषां न भीतिः क्वचित्
अन्येषां निजजीवनं भुवि तले कष्टप्रदञ्चाभवत् ।
सर्वे ते शरणागतास्सुनियते काले, यदिष्टो मम
तेषां भाग्यविधायकोऽहमधुना नेत्रे त्वदीये स्थितः ।।

(२६)

धन्या ते जनतानुरागसहिता नीतिश्च या पुष्पिता
कार्याधिष्ठित-मानसस्य समये कीर्तिस्सदा वर्धताम् ।
दक्षश्चापि हि बञ्चने निजजनञ्चामर्दने कामिनी
नो जानाति कुतो मदीयभगिनी चार्द्धाङ्गिनी वा कुतः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२७)

समत्वमेतन्मम लोकतन्त्रे
प्रवर्द्धयन्तु प्रबुध-प्रवीराः ।
उवाच बाला च जहास तूर्णं
हासञ्च जग्मुर्नवनीतिसिद्धाः ।।

इति विजयवर्णनो नाम द्वितीयांशः

[अथ तृतीयांशः]

(१)

ज्ञातुं राजनियन्त्रणं जनपदे राज्ञा नियुक्तस्तु यः
ज्ञात्वा सर्वमतत्त्वात्वसहितं भाविप्रियावेदकम् ।
राज्ञः सम्मुखमागतो नतशिरः सर्वान्निना मप्रियान्
यत् ज्ञातं तदतथ्यमात्ररहितञ्चाज्ञामवाप्यालपत् ।।

(२)

राजन् ! राज्यगताः प्रजाःप्रमुदिताः सूर्योदये: वारिजा
सर्वे कार्यरताः न कर्मविरसाः कश्चित् क्वचित् दृश्यते ।
स्वक्षेत्र निजसाधनैर्विरहितश्चाप्येति वृद्धिं परां
यो यस्मिन् प्रतितिष्ठति प्रतिदिन तत्रैति सम्वर्द्धनम् ।।

(३)

दीनाः दीनतराः भवन्ति धनिनां नित्यं धनोपार्जनं
कार्याकार्यमति विनापि जनता स्वोच्चस्थितिं विभ्रति ।
कार्यं नास्त्यनुशासनस्य जनतामध्ये किमस्त्यद्भुतं
त्वत्पादाचरणप्रवीणमतयः कुर्वन्ति वै निणयम् ।।

(४)

सर्वत्र प्रतिभाति देशविपिने स्वातन्त्र्यसञ्चारणं
अश्वानामपि मर्दन क्वचिदिह प्रीतिप्रियैःरासभैः ।
ये देवाचनमागताः[1] सुमतयः सार्द्धं स्ववशोद्भवैः
तेषां किं कथनं ? तदीयकथने संभाविताः देवताः ।।

१- देवः राजा

(५)

नित्यं कार्यविघातिनः स्वसमये उच्चाधिकारस्थिता
रूपं वीक्ष्य समागतस्य नियतं कुर्वन्ति कार्यं स्वयम् ।
द्रव्येणैव विनिर्जितास्सुमतयः स्वोच्चाधिकारस्थिता
दृष्ट्वा कञ्चनकामिनीं भुवि तले को वा न मोहश्रितः ।।

(६)

छात्राश्चौर्यकलाप्रवीण-मतयो विद्याग्रहे दुर्लभाः
ये जानन्ति न नामलेखनविधिं तेऽपि स्थिताः पाठकाः ।
नित्यं द्रव्यविधायकास्सुमतयः कार्यालये संस्थिताः
द्रव्याघातमवाप्य याति सततं कार्याथिनी सञ्चिका ।।

(७)

द्रव्यार्थं जनतापराधविषये वार्तामिमां श्रूयताम्
नित्यं मार्गगताः जनाः विनिहताः प्रायः शतं वाधिकाः ।
तत्राप्यस्ति समन्वयो न हतको भुङ्क्ते स्वयं तद्धनं
रक्षाकमपरायणाय नियतं द्रव्य ददाति स्वयम् ।।

(८)

पद्मा पद्मगता च शूलशिखरे नित्यं स्थिता शारदा
तन्त्रस्यास्य दिवाकरस्य हसनात् ह्रासं गता पद्मिनी ।
आह्लादभ्रमरानुयोगविरहः शूलेऽस्ति मे तेन किम् ?
उद्याने किमु याति शूलशिखरं सारप्रियः पुष्पपः ।।

(९)

दण्डाचार्य-परायणस्य नयने या सङ्गता सुन्दरी
सा नित्यं परिमर्दिता स्वभवनं यातीह नो विस्मयम् ।
या काचित् विमुखा प्रयाति पुरतः दुष्टस्य देहार्पणात्
सा नूनं यम-मन्दिरं व्रजति वा लोके सदा पापिनी ।।

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवाहसंस्कारे नारीचर्चा

—डॉ० मनुदेवः 'बन्धुः', उपाचार्यः (रीडरः) वेदविभागे
गुरुकुलकांगड़ीविश्वविद्यालयः, हरिद्वारम् (उ०प्र०)

महर्षिदयानन्दप्रणीतसंस्कारविधौ षोडश-संस्काराणां वर्णनं वेदसम्मत कल्याणकारि च वर्त्तते। एतेषु संस्कारेषु विवाहसंस्कारः प्रधानतमो विद्यते। यतोहि मानवानामनवरता सृष्टिः अस्मादेव प्रसरति। गृहस्थाश्रमस्य समुद्भूतिरपि विवाह-संस्कारादेव भवति। अत एव वेदेषु शास्त्रेषु च गृहाश्रमः स्वर्गत्वेनोपवर्णितः।

सर्वप्रथमं वधूवरौऽन्योन्यहस्तं गृहीत्वा प्रतिजानीतः यत् 'विश्वेदेवाः सर्वे विद्वांसः आवयोः चेतांसि समञ्जन्तु परस्परं मेलयन्तु। स्नेह-भावान्नानि कुर्वन्तु। जलानि आवयोर्हृदयानि समञ्जन्तु। मातरिश्वा वायुः नौ हृदयानि संयोजयतु। द्यावापृथिव्योर्धारयिता सूर्यः जगद्धारयिता परमात्मा नौ हृदयानि संदधातु। देष्ट्री उपदेष्टा पुरोहितश्चावयोः हृदयानि सम्मेलयताम्। यथा जलं स्निग्धगुणेन, वायुर्गतिगुणेन, सूर्यस्तेजो गुणेन पदार्थान् परस्परं संयोजयति। परमेश्वरश्चस्वेक्षणब लेन त्रिगुणात्मिकां प्रकृतिं संदधाति, तथैवावयोर्वरवध्वोर्हृदयमप्येते विश्वे देवाः विशेषेण संयुक्तं स्नेहापन्नं कुर्वन्तु। गृहस्थाश्रमे प्रेम एव मूलतत्त्वम्।[1]

ततो गृहमध्यान्मण्डपस्थं यज्ञकुण्ड-समीपं सहस्त-ग्राहम् उभौ समागच्छतः। तत्र च वरो निम्ननिर्दिष्टं मन्त्रयुगलमुच्चारयति स्वपत्नी-विषयकान् गुणांश्च प्रकटीकरोति—

यः परमेश्वरः प्राणदाता, सर्व-दुःख-हर्त्ता सुखदाता च वर्तते तस्येशस्य कृपया स्वपुरुषार्थेन च त्वं हे वरानने ! अघोर-चक्षुः प्रियदृष्टिः भव। पतये कल्याणकारिणी भव। चतुष्पाद्भ्यः पशुभ्यः शिवा हितैषिणी भव। पवित्रान्तःकरणा प्रसन्नचित्ता च शुभगुणकर्म-स्वभावयुता, विद्यया प्रकाशिता वीरप्रसवा, देवरकाङ्क्षिणी, सुखवती च भूत्वा नः द्विपदे मनुष्यवर्गाय चतुष्पदे गवादि-पशुवर्गाय च सुखहेतुर्भव। तथैवाहं वरोऽपि वर्त्तेयम्।[2]

भूर्भुवः स्वर्गुणैर्युक्तः परमेश्वरो मया स्मर्यते। सा वधू नः मम पोषयित्री भवतु। हे पूषन् ! हे परमेश्वर ! कल्याण-गुण-शीलसम्पन्नां तां वधून् अस्मान् प्रति प्रापय। मम वधूः पुत्रकामा सती अस्माकं सवथनोः विहर। यस्यां त्वयि पुत्रकामोऽहं शेफं शिश्न प्रहरेयं

१– ओ३म् समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ॥
—ऋग्वेदे १०/८५/४७, पारस्करगृह्यसूत्रे १/४/१४

२– ओ३म् भूर्भुवः स्वः। अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमना सुवर्चाः।
वीरसूर्देवृकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे॥
—ऋग्वेदे १०/८५/४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवेशयेयम् । त्वयि पत्न्यां निश्चयेन धर्मार्थकाममोक्षरूपाः बहवः कामा व्यापकाय सुखाय सन्ति ।[3]

पाणिग्रहणम्–

विवाह–संस्कारे पाणिग्रहणविधेर्विशेषमहत्त्वं विद्यते । अमुना विधिना स्वोत्तरदायित्वं विज्ञापयति, स्वकर्त्तव्यानि च गणयति । वर आसनादुत्थाय पूर्वाभिमुखोपविष्टाया वध्वाः सम्मुखे पश्चिमाभिमुखमुपतिष्ठन् स्ववामहस्तेन वध्वाः दक्षिणहस्तमुत्तानमुत्थापयति । स्वदक्षिणहस्तेन चोत्थापितवधूदक्षिणहस्ताञ्जलिम् उत्तानमेव साङ्गुष्ठं गृह्णाति । पत्नीं प्रति स्वकर्त्तव्यानि बोधयति च— वरो वदति— हे वरानने ! अहं सौभाग्याय तव हस्तं गृह्णामि । त्वं मया पत्या सह सुखपूर्वकं जरावस्थापर्यन्तं निवस । सकलैश्वर्ययुक्तो भगः, न्यायकारी अर्यमा, सकलजगदुत्पादकः सविता, सकल–जगदुद्धारक. पुरन्धिः परमात्मा, समुपस्थिता अन्ये च विद्वांसो वृद्धपुरुषाः गृहस्थधर्म–पालनाय त्वां मह्यं दत्तवन्तः ।[4]

हे प्रियतमे ! अहमैश्वर्ययुक्तो धर्ममार्गप्रेरकश्चास्मि । अहं भगः सविता च भूत्वा तव हस्तं गृह्णामि । त्वं धर्मणा धर्माचरणपूर्वकं मदीया भार्या पत्नी असि, अहञ्च तव गृह–पतिः गृहपालकोऽस्मि ।[5] हे सुखदायिके ! त्वं मम पोष्याऽसि । तव रक्षणमहमेव करिष्यामि । बृहस्पतिरूपः परमात्मा त्वां मह्यं दत्तवान् । प्रजावती सन्तानवती भूत्वा त्वं मया सह शतं वर्षाणि सुखेन प्राणिहि ।[6] हे त्वष्टः ! इमां तेजस्विनीं नारीं मदीयां पत्नीं सन्तत्या सह पालयतु । प्रकृतौ सोमः सूर्यां विवहति । तत्र सूर्या यथा तेजो वाससा समलङ्कृता भवति, तथैवेयं वधूरपि भवेत् ।[7]

हे मम मातापितरौ ! हे मम सम्बन्धिजनाः ! जगति विद्यमानाः सर्वे देवाः ज्येष्ठाः श्रेष्ठाः महाजनाः सज्जनाः इमां सम्मुखीभूतां नारीं मदीयां धर्मपत्नीं भवन्तः पुत्रीपुत्रादिभिः

३- ओ३म् भूर्भुवः स्वः । सा न पूषा शिवतमामेरय सा नः ऊरू उशती विहर ।
यस्यामुशन्तः प्रहराम शेफं यस्यामु कामा बहवो निविष्ट्यै ॥
—ऋग्वेदे १०/८५/३७, पारस्करगृह्यसूत्रे १/४/१६

४- ओ३म् गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्य त्वादुर्गार्हपत्याय देवाः ॥
—ऋग्वेदे १०/८५/३६, अथर्ववेदे १०/१/५०

५- ओ३म् भगस्ते हस्तमग्रभीत् सविता हस्तमग्रभीत् । पत्नी त्वमसि धर्मणाऽहं गृहपतिस्तव ॥
—अथर्ववेदे १४/१/५१

६- ओ३म् ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः । मया पत्या प्रजावति शं जीव शरदः शतम् ॥
—अथर्ववेदे १४/१/५२

७- ओ३म् त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् ।
तेनेमां नारीं सविता भगश्च सूर्यामिव परिधत्तां प्रजया ॥
—अथर्ववेदे १४/१/५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्धयन्तु। आशीर्वचोभिरस्मान् कृतार्थयन्तु।[8]

अहं स्वपत्नीं दृष्ट्वा अन्तःकरणेन कुलवृद्धि पश्यामि। विवाहानन्तरं मनसावाचाकर्मणा अहं स्तेयं चौर्यं न करिष्यामि। एकाकी न किमपि भक्षयिष्यामि। त्वमपि मया सह चौर्यरहितं व्यवहारं कुरु।[9]

प्रतिज्ञामन्त्रः

पाणिग्रहणान्ते वरो वधू-हस्ताञ्जलिं प्रगृह्य तामुत्थापयति। कलशमुरुषसहितञ्चोभौ वरवध्वौ यज्ञकुण्डं परिक्राम्यतः परिक्रम्य च निम्नमत्रण प्रतिज्ञां कुरुतः। वरः स्वपत्नीमभिलक्ष्य कथयति —

हे कन्ये! अहं ज्ञानवान् सत्योपदेशकः गतिशीलः सम्मननशीलश्चास्मि। त्वञ्च ज्ञानवती सत्योपदेशिका गतिशीला सम्मनन-शीला चासि। अहं सामवेदोऽस्मि त्वञ्च ऋग्वेदोऽसि। अहं द्युलोकोऽस्मि, त्वञ्च भूमिरसि। अहं द्युलोकस्थसूर्यवद् वर्षकोऽस्मि, त्वञ्च पृथिवीवद्गर्भादिधारयित्री वर्त्तसे। त्वमहञ्चावामुभावेव विवाहं कुर्वीवहि। परस्परं संयुक्तौ भूत्वा रेतः वीर्यं धारयेव। पुत्रपुत्रीरूपां सन्ततिमुत्पादयेव। ते च पुत्रा जरदष्टयः दीर्घायुषो भवन्तु। आवां जायापती परस्परं सम्यक् प्रीतिशालिनौ परस्पर-रुचियुक्तौ शोभन-विचारौ च भवेव। पुत्रपौत्रादिसहिता वयं शतसंवत्सरान् पश्येम रूपग्रहणसमर्था भवेम। शतं शरदः प्राणान् धारयेम। शतवर्षाणि तीव्रश्रवणशक्ति-युक्ता भवेम।[10]

विशेषाभिप्रायः—

अमुष्मिन् मन्त्रे वरवधूयुगलं मिलित्वा साम भवतीति सूचितम्। साम समस्वरतायाः साम-ञ्जस्यस्य संगीतस्य च द्योतकम्। **'ऋच्यध्यूढं साम'** इति छन्दोगाः पठन्ति। एवोमेव ऋग्रूपायां पुरुषेऽधिरूढे गृहस्थ-यज्ञः प्रवर्त्तते। सामशब्दश्च 'सा+अम' इत्यनयोर्योगेन सम्पद्यते। तत्र वधूः 'सा' पुरुषश्च 'अ'। 'सा' तुऋग्रूपा, मृदुला, मधुरा, संगीतमयी नारी, अमश्च बालज्ञानप्राणा-दिसम्पन्नः पुरुषः। एवं तयोर्योगेन गृहस्थाश्रमः संज्ञको भवति। दनतन्तरं भूयोऽपि स्पष्टीक्रियते **'साम अहस्मि, ऋक् त्वम्'** इति। पुरुषः साम, वधूश्च ऋगिति। **'द्यौरह पृथिवी त्वम्'** इत्यनेन पतिर्द्युलोकस्थसूर्यवत् सेचन-समर्थो वधूश्चपृथिवीवद् गर्भधारणसमर्था भवेदित्युपदिश्यते, येन तौ प्रकृष्ट

८- ओ३म् इन्द्राग्ना द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा।
बृहस्पतिर्मरुतो ब्रह्म सोम् इमां नारीं प्रजया वर्धयन्तु॥
—अथर्ववेद १४/१/५४

९- अहं बि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम्।
न स्तेयमद्मि नसोदमुच्येस्था श्रथ्नानो वरुणस्य पाशान्॥
—अथर्ववेदे १४/१/५७

१०- ओ३म् अमोऽहमस्मि सा त्वं॰सा त्वमस्यमोऽहम्। सामाहमस्मि ऋक्त्वं द्यौरह पृथिवी त्वं तावेव विवहावहै सह रेतो दधावहै। प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून्। ते सन्तु जरदष्टयः सम्प्रियो रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं जीवेम शरदः शत॰शृणुयाम शरदः शतम्॥
—अथर्ववेदे १४/२/७१, अश्वलायनगृह्यसूत्रे १/७/६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजाजनने समर्थो स्याताम्। किञ्च वरस्य द्युलोकवत्। तेजोज्ञानादिमत्त्वं वध्वाश्च पृथिवीवद् धृतिक्षमादिगुणवत्त्वं चापि संसूच्यते। अत्र **'बहून पुत्रान् विन्दावहै'** इत्युक्तम्। तेन नायमभिप्रायो यत् पुत्रपुत्र्यः अनिवार्यत्वेन बहव एव स्युः, तेऽपि च पुत्रा एव भवेयुर्न पुत्र्य इति। सन्तानानां न्यूनत्वं बहुत्वं वा समाजस्य राष्ट्रस्य चावश्यकतानुसारं स्पृहणीयं भवति। पुत्रेषु च पुत्र्योऽपि सम्मिलिताः **'पुत्राश्च पुत्रश्च इति पुत्रा'** इत्येकशेषसमासः। पुत्राश्च जरदष्टयः दीर्घायुषः सन्त्विति प्रार्थितम्। नैवं भवेद् यद् बहुसंख्याकाः पुत्राः भवन्तु' परं ते कृशा रोगार्त्ता अल्पायुषश्च सन्तु। तदपेक्षया तु एको दृढाङ्गः स्वस्थः शताधिकायुष्क एव वरम्। गार्हस्थ्यजीवने मन्त्रस्यान्तिमांशेन वधूवरौ परस्परं प्रीतिमन्तौ अन्योऽन्यस्याकाङ्क्षिणौ तेजस्विनौ सर्वदा-शोभमानविचारौ च भवेतां येन सुखसागरतरङ्ग-तरङ्गितौ तौ शताधिकवर्षाणि सकलेन्द्रियशक्ति-युतां जीवेतामिति ज्ञाप्यते।

स्वामिदयानन्दविचाराः –

स्वामिदयानन्देन विवाहप्रतिज्ञाविषये वेदभाष्येऽपि बहुलिखितम्।यथा– 'विवाहप्रतिज्ञा-स्वियमपि प्रतिज्ञा कारयितव्या। हे स्त्रीपुरुषौ। युवां यथा स्वहितायाचरथः तथास्माकं मातापित्रा-चार्यातिथीनां सुखायापि सततं वर्तेयाथाम्।'

(यजुर्वेद १५/५५)

अन्यत्रापि वेदभाष्यकर्त्रा महर्षिणा दयानन्देन विलिखितं यत् 'विवाहे स्त्रीपुरुषाभ्यामियमपि द्वितीया प्रतिज्ञा कारयितव्या येन ब्रह्मचर्येण यथा विद्यया च युवां स्त्रीपुरुषौ कृतकृत्यौ भवथस्तत् तां च सदैव प्रचारयतम्। पुरुषार्थेन धनादिकं च वर्धयित्वैतत् सन्मार्गे वीतम्।'

—यजुर्वेदे १५/५६

सुमङ्गली

सुमङ्गलीरियं वधूरिमां समेत पश्यत्।
सौभाग्यमस्यैदत्वा याथास्तं विपरेतन।।

—ऋग्वेद १०/८३/३३

मन्त्रार्थः –प्रतिपादयति दयानन्दः हे समुपस्थिताः सभ्याः! इयं वधूः परिणीता मम जाया सुमङ्गलीः मङ्गलकर्त्री प्रशस्त-मङ्गलस्वरूपा वर्त्तते। यूयं समेत समागच्छत, समागत्य चेमां पश्यत अवलोकयत। अस्यं सौभाग्यं सौभाग्याशी-र्वचांसि, दत्त्वाय प्रदाय अस्तं स्वगृहं विपरेतन गच्छत। **'पश्यत्'** इति सूचयति यन्नारीणाम् अवगुण्ठन-प्रथा न वेदभिमता।

शिलारोहणम्–

आरोहेममश्मानमश्मेव त्वं स्थिरा भव।
अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः।।

—पारस्कर गृह्यसूत्रे १/७/१

मन्त्रार्थ- हे देवि! त्वम् इमं सम्मुखे स्थितम् अश्मानं प्रस्तरम् उपतिष्ठ। अश्मेव प्रस्तरमेव त्वं स्थिरा भव, गृहस्थाश्रमे पातिव्रत्यादिधर्मेषु अचला भव, संकटसमयेऽपि च धैर्यं मा त्याक्षीः। पृतन्यतः शत्रून् अभितिष्ठ सर्वतो रुन्धय। पृतनायतः संग्राममिच्छतः परिपन्थिनश्च अववाधस्व पद्भ्यां विलोडय, तान् न्यक्कृत्य भग्नोद्यमान् कुर्वित्यर्थः। अश्मारोहणविधिना वध्वै विशिष्टसंदेशः प्रणिदीयते। वैदिकदृष्ट्या नारी दुर्बला नास्ति। अश्मा खल्ववत्र दार्ढ्यस्य प्रतीकम्। निर्दयानां पाषाणहृदयानां शत्रूणां दमनाय स्वगौरवप्रतिष्ठायै च वधू पुरुषानेव नाश्रयेद्, अपितु स्वयमप्यस्मिन् कर्माणि प्रयतते। यथा प्रस्तरः सुदृढो भवति तथैव वधूरपि गार्हस्थ्य-जीवने शारीरिकं मानसिकम् आत्मिकञ्च दार्ढ्यं गृह्णीयादित्युपदिश्यते।

उपसंहारः

विवाहशब्दस्यार्थः – वि पूर्वाद् वहः धातो घञ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रत्यये कृते विवाहशब्दसिद्ध्यति। वहनं वाहः विशिष्टो वाहो विवाह इति। 'विवाह विशिष्टवहनम्' इति शब्दकल्पद्रुमः। यद्यपि विशिष्टं वहन यस्य कस्यापि वस्तुनः सम्भवति, तथापि विवाहशब्दो योगरूढित्वेन साम्प्रत दारपरिग्रहार्थ एव प्रयुज्यते। कः पुनरय विवाहो नाम? उपायतः प्राप्तायः कन्यायां दारकर्मणार्थः संस्कारः पाणिग्रहण लक्षणः" इति मेधातिथिः मनुस्मृति-भाष्ये ३/२०। "विवाहः भार्याप्राप्तिहेतुः इति कुल्लूकभट्टः। 'दारपरिग्रहे तज्जनके व्यापारे च' इति, वाचस्पत्यम्।" उपयामः परिणयनं पाणिग्रहण विवाह उद्वाहः। इति हलायुद्धः सनियम प्रसिद्धया स्वेच्छया पाणिग्रहण विवाह इति सन्तानोत्पत्त्ये, वर्णानुकूलमुत्तकर्मसिद्धये च स्त्रीपुरुषयो सम्बन्धो विवाहः। इति च स्वामि-दयानन्दः।

वैदिकी नारी — शतपथब्राह्मणं शारीरिकदृष्ट्या पृथुश्रोणि, विस्तृतकुचा क्षीणमध्याञ्च योषां प्रशंसति। आश्वलायनगृह्यसूत्र-'बुद्धिरूपशील-लक्षणसम्पन्नाम् अरोगाञ्च कन्यां विवाहेत्' इत्युल्लिखति। भारद्वाजगृह्यसूत्रमते वित्त, रूपं, प्रज्ञा, बान्धवमिति चत्वारि विवाहकारणानि सन्ति। क्रोधरहितां हर्षयुतां महिर्षीम् अनन्यपूर्वा यवीयसी भार्या विन्देत, इति वाराहगृह्य-सूत्र सूत्रकारस्य मतम्। मनुस्मृतौ अव्यङ्गाङ्गी, सौम्यनाम्नी, हंसवारणगामिनी, तनुलोमकेश-वदना, मृद्वङ्गी च स्त्री उद्वाहयोग्या वर्णिता। शारीरिकदृष्ट्या, कपिला, अधिकाङ्गी रोगिणी, अलोमिका, अतिलोमा, वाचाला पिङ्गला च कन्या अविवाह्या भवति। या कन्या ब्रह्मचर्य-विलासयोगा, सौभाग्यकारिणी, विदुषी, उपगुण-वद् वर्तमाना, प्रशंसित सौन्दर्यशुभलक्षणलक्षिता, अनवद्यशास्त्रविज्ञानेरममाणा, शुभगुणकर्मस्वभावा,

हरिद्वारस्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः संस्कृतमासिकम्
गुरुकुलमहाविद्यालयः—२४९४०४

सेवायाम्,
श्री ...

२५० श्री पुस्तकालयाध्यक्ष
वाल्मीकि संस्कृत विद्यापीठ
प्रदर्शनी मार्ग,
काठमाण्डु (नेपाल)

ब्रह्मचारिणी, मेधस्वना, मितभाषिणी, पवित्रा, हृद्या, वरसदृशी गृहीतशिक्षा रूपलावण्यादिशुभ-गुणाढ्या, दुःखध्वंसिका, सुखजनयित्री, सुखप्रदा, सुहृद्वदाज्ञानुकारिणी, सेविका, अद्वेषिणी, सत्यवाक्, प्रशंसिता, प्रिया, सुलक्षणा, पतिव्रता, सर्वाङ्ग-सुन्दरी, अद्भुतरूपा, बहुप्रजोत्पादयित्री, बलिष्ठा विचक्षणा, धनैश्वर्यवर्धिका, धनरक्षणे तत्परा, शूरवीरोत्पादयित्री, सहनशीला भूमिवत् क्षमा-न्विता, अन्तरिक्षवद्क्षोभा, यन्त्रवर्जितेन्द्रिया, क्रूरतादिदोषरहिता, अन्येषामपि दोषनिवारिका भवेत् सैव विवाहयोग्या भवति इति दयानन्दः स्ववेदभाष्यभावार्थेषु लिखति। शारीरिक-दृष्ट्या कन्यावरापेक्षया तनीयसी तत्स्कन्धमिता च भवेत्।

★

मुद्रकेण, प्रकाशकेन डा० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्र प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीयगुरुकुलमहाविद्यालयसभया।
सम्पादकः डॉ० हरिगोपालशास्त्री

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu